Bill No. 3/07-08

16

2008-0167

चमत्कार चिन्तामणि of श्री नारायण भट्ट with the commentary अर्थदीपिका of दैवज्ञ धर्मेश्वर मालवीय – Published by बंगाली साहू at सत्यनारायण प्रेस. Loose leaves lithoprint edn., Benares, 1955 Vikram era

(35)

॥ अथ चमत्कारचिन्तामणिटीकासहितप्रारंभः

KALANIDHI
Rare Book Collection
ACC No.: R-167
SANS
133.5
BHA
DATA ENTERED
Date 30/8/08

श्रीगणेशाय नमः ॥ गणेशं शारदां भास्करं रामचंद्रं भवानीं प्रणम्याथ टीकां सुरम्यां चमत्कारचिंतामणेर्दैवनंदात्मबोधाय कुर्मः
संब्रवीति १ अथ जन्मकुंडलिकायां जातकानां शुभाशुभभावफलज्ञानाय चमत्कारचिंतामणिं विवक्षुर्नारायणाख्यः प्रारिप्सि
तनिर्विघ्नपरिसमाप्त्यर्थं श्रीकृष्णप्रणामरूपं मंगलमाचरन् शिष्यशिक्षायै निबध्नाति अत्रास्मिन्ग्रंथप्रारंभसमये नारायण
नामाचार्योऽहं लसच्छोभपीतवर्णपट्टांबरं यस्य तं घनं मेघमिव विद्युता विद्युद्रूपया राधयालिंगितं कृष्णचन्द्रमिवाल्हादकं श्रीकृ

लसत्पीतपट्टांबरं कृष्णचंद्रमुदा राधयालिंगितं विद्युतेव घनं संप्रणम्यात्र नारायणोहं चमत्कारचिं
तामणिं संप्रवक्ष्ये १ क्वणत्किंकिणीजालकोलाहलाढ्यं लसत्पीतवासो वसानं चलंतं यशोदांगणे
योगिनामप्यगम्यं भजेहं मुकुंदं घनश्यामवर्णं ॥ २ ॥ ॥ ष्णं प्रणम्य कायवाङ्मनोभिर्नत्वा चमत्कारचिंतामणिनामा

नं ग्रंथं संप्रवक्ष्ये सम्यक्प्रकारेण रचयामीत्यर्थः १ पुनर्बालगोविंदभजनपूर्वकं पूर्वोक्तं मुकुंदं प्रकरयति क्वणन्तः शब्दायमान
स्य किंकिणीजालस्य कटिबद्धक्षुद्रघंटिकासमूहस्य कोलाहलेन झणत्कारेणाढ्यं युक्तं तच्छब्देन तन्मानसं बाललसत्पीतवासो वसा
नं शोभमानं पीतांबरं धारयंतं योगिनामप्यगम्यं प्राप्तुमशक्यमपि यशोदांगणे चलंतं गच्छंतं घनवत्श्यामवर्णं कृष्णरूपं मुकुंदं
अहं भजे योगिभिरप्राप्यं यशोदांगणपर्यटंतं श्रीकृष्णं मनसा स्मरामीति स्वमहद्भाग्यातिशयोक्तिः ॥ २ ॥ ६ ॥ ॥ राम १

Indira Gandhi National Centre for the Arts

अथसप्रयोजनंग्रंथंविशिनष्टिमहान्बोधोज्ञानंयस्मात्तच्चतुर्लक्षमितंज्योतिःशास्त्रमुच्चैरेवप्रमथ्येवसम्यग्विचार्यविद्वज्जनानांदे
वज्ञानामानंदहेतोःसुरसार्थपरंश्रेष्ठंयुक्तिभिःपदलालित्यैरम्यंसुंदरंसंक्षिप्तशब्दमबहुविस्तरंभुजंगप्रयातेभुजंगप्रयातंभवे
देश्चतुर्भिर्यरितिलक्षणकभुजंगप्रयाताख्यच्छंदोभिःप्रबंधंचमत्काररचिंतामणिरूपंकरोमिलहुजीहायपढैसोविलहुइतिपिंग
लोक्तत्वाद्यैश्छन्दोभंगःशंकनीयःचतुर्लक्षकंज्योतिषंभूभेरिदमित्येवंवाप्रथमंपादःपठनीयः॥३॥अथग्रहभावफलंकथया

चतुर्लक्षज्योतिर्महान्बोधमुच्चैःप्रमथ्येवविद्वज्जनानंदहेतोःपरंयुक्तिरम्यंसुसंक्षिप्तशब्दंभुजंगप्रया
तैःप्रबंधंकरोमि ३ नचेत्खेचराःस्थापितेकिंभचक्रेनचेत्तस्यष्टगाःस्थापितेःकिंग्रहेंद्रैःअभावोदितस्य
स्पष्टताकात्रहेतुःफलैरेवपूर्वैर्ब्रुवेतानितस्मात् ४ ननुस्थैरविस्तुगयस्थिंविधत्तेमनःसततप्रहारदापादवर्गात्

मीतिप्रतिजानीतेनेतिभचक्रस्थाःखेचराःग्रहानचेत्स्थापितेभचक्रेराशिमंडलेकिंनकिंचित्फलमित्यर्थःतथाग्रहाअपि
स्पष्टगाद्दृग्गणितसाधितानचेत्स्थापितेग्रहेन्द्रैःकिंअभावोदिताभावस्पष्टीकृतंविनासाधिताग्रहस्पष्टताफिकाचनकिंचि
त्करेत्यर्थःतस्मादादौस्पष्टाःखेचरास्तन्वादिभावाअसाध्याद्विभावःअथग्रहभावस्पष्टीकरणेहेतुःप्रयोजनमुच्यतेइति
शेषःयतःफलैरेवजनोःसर्वज्ञायतेतस्मात्तानिग्रहभावफलानिब्रुवेकथयामि ४ नन्वादौरवेःतन्वादिभावफलानिकथयति

Indira Gandhi National Centre for the Arts

यस्यनतुस्थोलग्नस्थोरविस्तुंगयद्विमुक्तस्वरूपंविधत्तेदारिदायाद्वर्गात्स्त्रीपुत्रादिसमूहात्मनःसंतपेत्संतापंप्राप्नुयात्वात
पित्तेनवाप्युतपित्तेनवपुःशरीरंपीड्यतेतथासपुरुषःपर्यटन्देशान्तरंगच्छन्नित्यंनिश्चिंतंह्रासवृद्धिम् धनन्यूनाधिकत्वंप्रा
प्नोति ५ अथद्वितीयभावस्थरविफलंयस्यनरस्यलग्नभावकुंडलिकायांधनेलग्नाद्द्वितीयस्थानेभानुःसूर्यःसपुरुषोभाग्याधि
कःश्रेष्ठभाग्यःस्यात्चतुष्पात्सुखंगजाश्वादिसौख्यंलभेदितिशेषःचपुनःस्वद्रव्यंसद्व्ययेयातिगच्छतिधर्मादिविषयेव्ययंकुर्य्या

वपुःपीड्यतेवातपित्तैर्ननित्यंसवैपर्यटन्ह्रासवृद्धिंप्रयाति ५ धनेयस्यभानुःसभाग्याधिकःस्याच्चतुष्पात्
सुखंसद्व्ययेस्वंचयातिकुटुंबेकलिर्जायतेपिक्रियानिष्फलांयातिलाभस्यहेतोः ६ तृतीयेपदाऽहर्मणिर्ज
न्मकालेप्रतापाधिकंविक्रमंचातनोति तदासोदरैस्तप्यतेतीर्थचारीसदारिक्षयःसंगरेशंनरेशात् ॥ ७ ॥

दितिभावःजाययानिमित्तभूतयाकुटुंबेस्वबंधुविषयेकलिःकलहोजायतेभवेदित्यर्थःतथालाभस्यहेतोःआगःगल्भ्याक्रियापि
निष्फलायातिकृतोपियत्नादुद्यमःस्वाहंकारेणनिष्फलंस्यादित्यर्थः ॥ ६ ॥ अथतृतीयस्थरविफलंजन्मकालेतृतीयोयदा
अहर्मणिःसूर्यस्तदासपुरुषःप्रतापोधिकोयस्मिन्नेतादृशंविक्रमंपराक्रममातनोतिचपुनःसोदरैर्भ्रातृभिस्तप्यतेसंतापमा
प्नुयात् तीर्थचारीतीर्थगमनशीलोभवेत् संगरेसंग्रामेसदारिक्षयःशत्रुनाशस्तथानरेशात्नृपात्शंकल्याणंस्यात् ॥ ७ ॥



Indira Gandhi National
Centre for the Arts

अथचतुर्थभावफलंतुरीयेसुखभावेदिनेशेसूर्येविद्यमानेजनोमनुष्योऽतिशोभाधिकारादतिशयितोयोऽशोभाधिकारोद्रव्येशेक
मान्यतारूपस्तस्माद्धेतोर्वंधुतःस्वजनेभ्यःकिमुतान्यभ्यःविग्रहंकलहंतथाविपक्षाहवेशत्रुसंग्राममानभंगमतुलमभद्र
माप्नोतिप्रवासीविदेशगमनशीलोभवेत् तथातस्यचेतोमानसंकदाचिन्नशांतिंभजेत् सदाव्याकुलःस्यादित्यर्थः॥४॥अ
थसुतभावफलंभास्करेसुतस्थानगेपंचमेसतिनरःपूर्वजापत्यतापीपूर्वजस्यप्रथमजातस्यापत्यस्यपुत्रस्यतापीमाप

तुरीयेदिनेशेऽतिशोभाधिकाराज्जनःसंलभेद्विग्रहंबंधुतोपिप्रवासीविपक्षाहवेमानभंगंकदाचिन्न
शांतंभवेत्तस्यचेतः ४ सुतस्थानगेपूर्वजापत्यतापीकुशाग्रामतिर्भास्करेमंत्रविद्यः रतिर्वंचनेसंचको
पिप्रमादीस्मृतिःक्रोडरोगादिजाभावनीया ५ रिपुध्वंसकृद्भास्करोयस्यषष्ठेतनोतिव्ययंराजतोमित्रतोवा

वात्तन्मरणाच्छोकंततोदुःखंप्राप्नुयादित्यर्थःमंत्रविद्यायस्येतिसआगमवेत्तानीतिशास्त्रज्ञोवाप्रमादीअसावधानःसंचकोद्रव्य
संचयकृद्भवेदित्यर्थःतथातस्यमतिर्बुद्धिःकुशाग्रातिसूक्ष्मवस्तुविचारिणीवंचनेपरप्रतारणेरतिःप्रीतिःक्रोडरोगादिजा
कुक्षिव्याधिभवास्मृतिर्भावनीयाज्ञेयेतिसर्वत्रान्वयः ५ अथषष्ठभावफलंयस्यषष्ठेरिपुभवनेभास्करःसरिपुध्वंसकृच्छत्रु
घातीस्यात् तथाराजतोराजदंडनिमित्तान्मित्रतोमित्रकार्यहेतोर्वाव्ययंद्रव्यसव्ययंतनोतिकुर्यात् तथाप्रयाणेयात्रायांनिषादैर्भिः

Indira Gandhi National Centre for the Arts

ल्पैर्हेतुभिर्विषादंदुःखंकरोतिमार्गेचौरकृतलुंठनवशाद्दुःखंप्राप्नुयादित्यर्थःमातुःकुलेमातृवंशेतथाचतुष्पादतोऽश्वादिपा
३ पाद्दुपातः अथवामातृकुलाद्वाहनपतनाच्छृंगिपशुघाताद्वादुःखंभवेदितिशेषः अस्मिन्व्याख्यानेकुलादितिपाठः १० अथ
सप्तमरविभावफलं यदाद्युनाथः सूर्यः द्यूनंजातः सप्तमगस्तदानरस्यप्रियातापनंस्त्रीक्लेशः पिंडपीडाचस्वशरीरकष्टंचिंता
तत्पदार्थालाभेमनोव्याकुलत्वंक्रयेवस्तुसंग्रहेविक्रयेगृहीतवस्तुद्रव्यविनिमयेतुच्छलब्धिः स्वल्पलाभोभवेत्तथाप्रतिस्पर्द्धा

कुलेमातुरप्यच्चतुष्पादतोवाप्रयाणेनिषादैर्विषादंकरोति १० द्युनाथोयदाद्यूनजातोनरस्यप्रियातापनं
पिण्डपीडाचचिंताभवेत्तुच्छलब्धिः क्रयेपिप्रतिस्पर्द्धयानैतिनिद्रांकदाचित् ११ क्रियालंपटंत्वष्टमेक
ष्टभाजंविदेशीयदारान्भजेद्व्याप्यवस्तुवसुक्षीणतादस्युतोवाविलंवाद्विपद्गुह्यजाभानुरुग्रंविधत्ते १२

याप्रतिवादीर्ष्ययाकदाचिन्ननिद्रामेतिनलभेदित्यर्थः ११ अष्टमभावफलं अष्टमेमृतिभावेभानुग्रहेक्रियालंपटंव्यव
हारेऽत्यंतधूर्तमतएवकष्टभाजंक्लेशिनंविधत्तेकरोतितथाविदेशीयदारान्गणिकादिकाः अथवावस्त्वभक्ष्यम
पिभजेत् दस्युतश्चौराद्धेतोर्विलंवादर्थाज्जतोर्विलंवादर्थाज्जनालस्याद्वावसुक्षीणताद्रव्यहीनतागुह्यजाविप
त्सरस्त्रीकृतेंद्रियविषयकष्टानादिजन्यक्लेशश्चाष्टमेखौस्यादित्यन्वयः १२ ॥

राम

अथ नवमभावफलं दिवानायके सूर्ये कोणयाने नवमस्थे सनरोऽनिच्छया मनोभावरहिततया तपश्चर्यया क्रियानुगतां क्रियाश्रेष्ठत्वं
तापकव्यवहारेणानुगतां पूज्यतां प्रयाति दांभिकस्तेऽपि लोकमान्यः स्यादिति भावः तथा सोदरेण भ्रात्रा हेतुभूतेन षतप्तः स्यात्तथ
त्तोदुष्टतापरदोहत्वमत्त एव चिंताविरामः शांतिरस्य चेतो नैवाप्नोति अत्र कोणशब्देन त्रिकोणं विवक्षितं वेदितव्यमित्यर्थः १३
अथ दशमभावफलं यस्य दशमे प्रयातः स्थितोंऽशुमान् सूर्योऽस्य नरस्य जनन्याः मातुर्यानं नारोगोद्भवं क्लेशं आतनोति वि

दिवानायके दुष्टताकोणयाने न चाप्नोति चिंताविरामोऽस्य चेतः तपश्चर्ययानिच्छयापि प्रयाति क्रियानुगतां त
प्यते सोदरेण १३ प्रयातोंऽशुमान् यस्य मेषूरणेऽस्य श्रमः सिद्धिदो राजतुल्यो नरस्य जनन्यास्तथा यानमानामात्तं
नोति क्लमः संक्रमे वल्लभैर्विप्रयोगः १४ रवौ संलभेत्स्वं च लाभोपयाते नृपद्वारतो राजमुद्राधिकारात्प्रता
पानलेशत्रवः संपतंति श्रियोनेकधा दुःखभंगोद्भवानाम् ॥ १५ ॥

स्तारयति तथा अस्य श्रमः पराक्रमो राजतुल्यः सिद्धिदो नृपोद्यभवत्सर्वार्थसाधकः स्यादित्यर्थः वल्लभैः प्रियैर्मित्रपुत्रकलत्रा
दिभिर्विप्रयोगः ततः क्लमो ग्लानिः संक्रमे तत्संभवेदिति तात्पर्यार्थः १४ अथैकादशस्यार्कफलं लाभोपयाते भावगे रवौ स
नरोऽन्तपद्वारतः स्वद्रव्यं राजदत्तमुद्राधिकारादनेकधा श्रियो मजाश्वादिसंपदः श्रेयो लभेत् किंच प्रतापानलेशत्रवः संपतंति

माधिकारदर्शनेन संतप्ताः स्युरितिभावः तथांगोद्भवानाम पत्यानां दुःखं च संलभेदित्यनेनान्वयः १५ अथ द्वादशस्थार्कफलं द्वादशे
गतोऽसौ रविर्नेत्रदोषं मंददृष्टित्वं पित्तव्यापदः पित्तप्रभवक्लेशान्करोतितथा विपक्षाहवे शत्रुसंगरे जयश्रीः लब्धुमिच्छया स्थि
तिरेकत्रावस्थानं अध्वप्रदेशे मार्गे हानिः क्षतिर्जायते भवेत् तथा देहदुःखं लीयते नश्यति आगतपनेद्वादशपन्त्यानुभवं व्याख्ये
यं पित्तव्येत्यादौ अध्वप्रदेशे पित्तव्यापदः पित्तव्यमरणं तत्कुठनाद्वा हानिः स्यादित्यर्थः १२ अथ चंद्रस्य तन्वादि द्वादशफला

रविर्द्वादशेनेत्रदोषं करोति विपक्षाहवे जायतेऽसौ जयश्रीः स्थितिर्लिप्सया लीयते देहदुःखं पित्तव्याप
दो हानिरध्वप्रदेशे १६ इति रवेस्तन्वादि भाव फलं विधुर्गोऽकुलीरा४जा१गः सत्वपुस्थो धनाढ्यनास्स
मानन्दलावण्यपूर्णं विधत्तेऽधमं क्षीणदेहं दरिद्रं जडं श्रोत्रहीनं नरं शेष लग्ने १ हिमांशौ वसुस्थानगे धान्य
लाभः शरीरेतिसौख्यं विलासोगनानां ॥

न्याह विधुश्चंद्रो गोकुलीराजगेषु वृषकर्क मेषस्थः सत्वपुस्थो लग्नगो धनाढ्यं धनाधिकारिणं आनंदलावण्यपूर्णम्॥
प्रमोदं नैपुण्य युक्तं शेषलग्नेकथितान्यराशौ अधर्मं धर्मरहितं क्षीणदेहं मंदवीर्यं दरिद्रं धनहीनं जडं मूकं मतिहीनं वा श्रो
त्रहीनं वधिरं नरं विधत्ते करोति १ हिमांशौ चंद्रे वसुस्थानगे द्वितीयस्थानगे शरीरेऽतिसौख्यं अंगनानां स्त्रीणां विलासः
क्रीडा कुटुंवे त्वर्थं धुषतु च्छा रतिः अल्पप्रीतिर्जायते भवेत् तथा दर्शने तत्सिन्पुरुषे हर्षे देवांगनापि च ॥ २ ॥



Indira Gandhi National Centre for the Arts

शंयातिकिमुतान्ययोषित् अतिसुंदरःस्यादितिभावः २ विधोविक्रमेत्नतीयेदौविक्रमेणोद्यमेनवित्तंधनमेतिप्राप्नोतिभा
मिन्यासुंदरस्त्रियारंजितोलोभ्यमानोपितपस्वीधर्मिणोवैजयंत्याधर्मध्वजिलेनप्रतापोज्वलोयशःशोभितश्चभवेत् तथातस्य
साहजंभ्रातृभवंकंसवंसुखंकियच्चिंतयेद्बहुलंभवेदित्यर्थः ३ बंधुगश्चतुर्थअत्रिजन्माचंद्रोयदानदापुरुषोबांधवैःसौख्यंसुत
स्त्रीगणात्पुत्रकलत्रसमूहात्सम्यक्तोषंसंतोषंसदेवनपहारसर्वाधिकारीराजद्वारसर्वकार्यकर्तान्यादिमेप्रथमेवयसिताहृशंनोव

कुटुंबैरतिर्जायतेनस्यतुच्छावशाद्दर्शनेयातिदेवांगनापि २ विधोविक्रमेविक्रमेणोत्तिवित्तंतपस्वीभवे
द्भामिनीरंजितोपिकियच्चिंतयेत्साहजंतस्यशर्मप्रतापोज्वलोधर्मिणोवैजयंत्या ३ यदाबंधुगोबांधवैरत्रि
जन्मानृपद्वारसर्वाधिकारीसदैववयस्यादिमेताहृशंनेवसौख्यंसुतस्त्रीगणात्तोषमायातिसम्यक् ४ यदापं
चमोयस्यनस्तत्रनाथोददातीहसंतानसंतोषमेव मतिंनिर्मलांरत्नलाभंचभूमिंकुसीदेननानाप्रयोगावसा
यान्नरिपौराजनेविग्रहेणापिराजाजितास्तेपिभूयोविधोसंभवंति ॥ यातिप्राप्नोतिसर्वाधिकारोपिमदोद्गवानितिभा

वः ४ यस्यजन्मनिपंचमोपदानस्तत्रनाथोविधुरस्मैसंतानंतोषंनिर्मलांमतिंरत्नलाभंभूमींशद्वक्षितिमपिददातितथाकुसीदेनकालां
तरव्यवहारेणयोव्यवसायएववासायउद्यमस्तस्मान्नानाप्रयोगबहुवस्तुलाभाःसुरितिशेषः ५ रिपौशत्रुभवनेविधौसतिराजविग्रहेणापि

Indira Gandhi National Centre for the Arts

च·सिं· रस्तेजसा कांतियुतः सन्नृराजते शोभते नेऽरथी शात्रवो जिताः पराजिताः अपि भूरिशो बहुधा तदग्रेऽनिप्रभाअप्रतिभाअपि भूयः पुनः संभवं
५ ति नष्टया मातरि शालमस्यास्तीति सन्नहृत्वा दृशो न स्यादिति शेषः ६ सप्तमे शीतरश्मिदारंशं स्त्रीसुखं अर्थवाणिज्यतो विदेशगमाए
राद्दृनिलभपि रदेन् कृष्णपक्षेतु स्त्रीजनेरतिं न ब्राह्मणाद्यासक्तिं ननु तत्सुखं मिष्टभुक् लुब्धचेता मिष्टभुक् लुब्धंचेतो यस्य सत्कृशो दुर्व
लोविपक्षाभिभूतः शत्रुभिः पराजितो भवेदिति शेषः ७ तस्य गेहे भेषजौभिषजां वैद्यानामियं सभा क्वाथमुद्गोदकानि पचेतुज्वराद्य
नदग्रेरयोनिः प्रभाभूयसोपि प्रतापोज्वलो मान्त्रशीलोनतः हृत् ६ ददेद्वारंशं सप्तमे शीतरश्मिर्धनिलभ
वेद्ववाणिज्यतोपि रतिं स्त्रीजने मिष्टभुग्लुब्धचेताः कृशः कृष्णपक्षे विपक्षाभिभूतः ७ सभा विद्यते भेषजीनस्य
गेहे पचेत् कर्हिचित् क्वाथमुद्गोदकानि महाव्याधयोभीतयो वारिभूताः शशी त्वष्टमे शंकृत् संकटान्यष्टमस्थः ८ तपो
भाववगस्तारके शो जनस्य प्रजाश्च द्विजा वंदिनस्तं भवन्ति ॥ भिभूत त्वे सति तन्निवारणाय बहवो वैद्या यत्नवंतः स्युरि
तिभावः कर्हिचिद्वारिभूता जलनिदानभवा महाव्याधयः राजरोगादयः भीतयो जलनिमज्जनभयानि संकटानि दुर्जनादि
जनितनर्वधनानि दुःखानि भवंतीत्येवं त्वष्टे शं कृत्कष्टकारकः शशी यद्यष्टमस्थो विद्यते भवेदित्यर्थः ॥ ८ ॥ यस्य जन राम
स्य तपोभावगो नवमस्थस्तारकेशश्चंद्रस्तं द्विजाः ब्राह्मणास्स ॥ ५

Indira Gandhi National Centre for the Arts

त्रियविंशोवंदिनः स्तुतिपाठकाः प्रजास्तदितरजनः स्तुवंतिगुणारोपंकुर्वंतियतोयोवनादेर्यौवनभूरत्नधनलक्ष्मीलव्यवहारादिहेतो
र्भोग्याधिकोभवत्येवतथाशरीरेसुखंसाहसंमनः प्रागल्भंचचंद्रवच्छोभनंअथवाकदाचिद्वृद्धिमानंकदाचिद्धीयमानभवतीत्य
र्थैर्वान्वयः ९ समुद्रांगजेअब्धिसुतेचंद्रेखगेदशमेसतिधर्मीकर्मीपुण्यकारीसन्बांधवेभ्यःसुखंनरेशादितोराजप्रभृतिजने
भ्यः शंकस्थाराणामपिनवीनांगनानांवैभवेप्रभुत्वेसुप्रियत्वंसुतराणांवल्लभत्वम् तथापुरोजातकेप्रथमसुतेल्पसौख्यंमयद्वापुरोजाय

भवत्येवभाग्याधिकोयोवनादेः शरीरेसुखंचंद्रवत्साहसंच ९ सुखंबांधवेभ्यःखगेधर्मकर्मासमुद्रां
गनेशंनरेशादितोपिनवीनांगनांवैभवेसुप्रियत्वंपुरोजातकेसौख्यमल्पंकरोति १० लभेद्भूमिपादिंदुना
लाभगेनप्रतिष्ठाधिकारांवराणिक्रमेणश्रियोथस्त्रियोंतःपुरेविश्रमंतिक्रियावेकृतीकन्यकावस्तु
लाभः ११ शशीद्वादशेशत्रुनेत्रादिचिंताविचिंत्यःसदासद्व्ययोमंगलेन॥

तेऽग्रेभवतीतिपुरोजातकाभ्र
त्यासेपुत्रस्वल्पसुखंप्रयातिप्राप्नोतीत्यर्थः १० लाभगेएकादस्थेनेदुनाचंद्रेणभूमिपाद्राज्ञःसकाशात्क्रमेणप्रतिष्ठाधिकारांवराणिमान्यता
ऽध्यक्षत्ववस्त्राणिलभेति अथांतःपुरेगृहमध्येश्रियोधनानिस्त्रियोवनिताविश्रमंतिस्थिराभवन्तितथावस्तुभ्योनानापदार्थेभ्योलाभः
क्रियायांदेकृतीश्रूरःकन्यकाचभवेदितिशेषः ११ द्वादशेशशीचेत्शत्रुतोभयंनेत्रादेर्विकारेण॥ ॥ ॥ ॥

चिंताविचिंत्यात्रियामंमनेलेनविवाहादिकार्येणासह्यायः शोभनेकुटुंबादोद्रव्यत्यागः पितृआदिमात्रादितः पितृआपितृभ्रातुरादिशब्दा
न्नतस्सुतवनितादिभ्योमातुः सकाशोरादिशब्दात्तत्सिस्तकुलजेभ्यश्चांतर्मनसिविषादोदुःखंप्रियाल्पप्रियत्वंस्वल्पसंतोषत्वंतेषांतेषुविरागि
त्वंभवेदितिशेषः चपुनःकामंमनोभिलषितंनप्राप्नोतीत्यर्थः १२ इतिविधुभावफलम् अथभौमस्यतन्वादिभावफलं विलग्नेकुजे
भौमेसतिदंडलोहाग्निभीतिः कलत्रादिघातःस्त्रीपुत्रनाशःशिरोनेत्रपीडाफलानांकार्यसिद्धिविपाकेपरिणामेसंदेवप्र

पितृव्यादिमात्रादितोंतर्विषादोनचाप्नोतिकामंप्रियाल्पप्रियत्वं १२ विलग्नेकुजेदंडलोहाग्निभीति
स्तपेन्मानसंकेसरीकिंद्वितीयःकलत्रादिघातःशिरोनेत्रपीडाविपाकेफलानांसदैवोपसर्गः १ भवेत्तस्य
किंविद्यमानकुटुंबेधनेंगारकोयस्यलब्धेधनेकिंयथात्रायतेमर्कटःकंठहारंपुनःसन्मुखंकोभवेद्वादभग्नः २

तिकार्यमुपसर्गोविघ्नोभवेदित्यन्वयेणान्वयः अतएवमानसंतपेत् तथापिद्वितीयःकेसरीकिंसिंहवदुद्यमीस्यादितिभावः
१ यस्यधनेद्वितीयभावेअंगारकोभौमोभवेत्तस्यविद्यमानेलब्धेधनेवासतिकुटुंबेस्वजनविषयेकिंनकिंचित्फल
मित्यर्थः यथामर्कटोवानरः कंठहारकेनापिकंठेसमारोपितंगुंजादिरचितहारंत्रायतेरक्षतितथासोपिकृपणोध राम
नंरक्षतिननष्टमंकदाचिदपिकुटुंबोपयोगायभवतीतिभावः तथातस्यवादे ॥ ५ ॥ ६

Indira Gandhi National Centre for the Arts

भग्नः पराजितः पुनर्भूयोपि विवादार्थं सन्मुखं कोपि भवेदिति मुखरनरः स्यादित्याशयः २ बाहुवीर्यं भुजबलं कृत्तः कृत्ता बाहुलक्ष्मीः
स्वभुजोपार्जितं द्रव्यं सहोत्थव्यथा भ्रातृपीडकेन भ्रशायते कथ्यते केनापीत्यर्थः च पुनः तपश्चर्ययोपहास्यं जनहासः कथं तेषां स्याद्वेषां
मानवानां तृतीयो मंगलो न चेत् सहजस्थो भौम एवं तत्फलं स्यादित्याशयः ३ यदा भूसुतः भौमस्तुर्यभावे चतुर्थस्थाने संभवेत्तदा जना
नां ग्रहाः सानुकूलाः शुभफलदाः किं तेनेत्यर्थः तस्मात्सुहृद्वर्गसौख्यं बंधुमित्रगृहमात्रादिजनितं सुखं न किंचिद्धि चिंत्यं तथा

कृत्तो बाहुवीर्यं कृत्तो बाहुलक्ष्मीस्तृतीयो न चेन्मंगलो मानवानाम् सहोत्थव्यथा भ्रश्यते केन तेषां तपश्च
र्ययाचोपहास्यं कथं स्यात् ३ यदा भूसुतः संभवेत्तुर्यभावे तदा किं ग्रहाः सानुकूला जनानां सुहृद्वर्गसौख्यं न
किंचिद्धि चिंत्यं कृपया वस्त्रभूमीर्लभेद्भूमिपालात् ४ कुजे पंचमे जाठराग्निर्बलीयान्न जातं न जातं निहंत्येक
एव तदानीमनल्पा मतिः किल्बिषेपि स्वयं दुग्धवत्तप्यते तं सदैव ५ न तिष्ठंति षष्ठेऽरयोंगारके चेत्तदंगेरिताः संगरेशाः

भूमिपालाद्राज्ञः सकाशात् कृपा च दया वस्त्रं च प्रसादः भूमिश्च ग्रामादिस्ताः कृपा वस्त्रभूमीर्लभेत् ॥ ४ ॥ पंचमे कुजे जाठरो
ग्निरुदराग्निर्बलीयान् प्रबलः किल्बिषे पापे पित्र्ये अनल्पा भूयसी मतिः स्यात् स्वयं चांतर्मनसि दुग्धवत्तप्यते सदैव माकु
लः स्यादित्यर्थः तदानीमेक एव कुजो जातमन्यज्जातमपत्यं निहंति नमारयत्येव ॥ ५ ॥ यस्य षष्ठस्थानेंगारके भौमे सति

Indira Gandhi National Centre for the Arts

मवलाअप्यरयः शत्रवस्तदंगेरिता स्तस्यांगे भौमाद्यादिभिर्वोत्सारिताः संगरे संग्रामे न तिष्ठंति पलायंत इत्यर्थः तद्वन्मनीषाविचारसमृ
द्धिर्मातुलेयो भ्रातृसहजः सुखी स्यादिति शेषः तथा वित्तद्रव्यं विलीयेत नश्येत् अपि पुनर्भूरि बहु वित्तं लभेत् ६ सप्तमे मेदिनीजः कुजः
स्पर्द्धिनां वादिनां प्रहारार्दनैस्ताडनपीडनादिभिर्मुहुः पुनः पुनर्भंगदः पराजयकारी तथा दंपतिघ्नः स्त्रीपुंसोर्नाशकोऽर्थात्तस्य जन्म
कुंडलिकायां सप्तमे विद्यमानः स्त्रीघ्नः कन्यकाजन्मकुंडल्यां च तत्पतिघ्नः इतिशेषः तथा अनुद्धारभूतेन निश्चितेन पाणिग्रहेण

मनीषासुखी मातुलेयो ननहृद्धिर्विलीयेत वित्तं लभेतापि भूरि ६ अनुद्धारभूतेन पाणिग्रहेण प्रयाणेन वाणिज्य
तो नो निवृत्तिः मुहुर्भंगदः स्पर्द्धिनां मेदिनीजः प्रहारार्दनैः सप्तमे दंपतिघ्नः ७ शुभास्तस्य किं खेचराः कुर्युर
न्यविधानेपि चेदष्टमे भूमिसूनुः सखा किं न शत्रूयते सत्कृतोपि प्रयत्नेकृते भूयते चापसर्गैः ॥ ८ ॥

विवाहेन हेतुना वाणिज्यतो व्यापारहेतोः प्रयाणेन यात्रागामी निवृत्तिर्न परावृत्त्यागमः स्यादित्यर्थः विवादाशया व्यापारलोभा
द्वा बहुकालं विदेशस्थो भवेदिति भावः ७ अष्टमे भूमिसूनुर्भौमश्चेत्तस्य विधाने भाग्येपि अन्ये शुभाः खेचराः किं कुर्युः कु
जस्य दुष्टफलदत्वेन शुभफलप्रतिबंधकत्वात्सत्कृतो मानितोपि सखा किं न शत्रूयते शत्रुरिवाचरति प्रयत्ने कृतेपि उपसर्गैर्विघ्नैर्भूयते प्रार

तपोभावगो नवमस्थितो मंगलस्तं नरं भाग्यवित्तं भाग्येन वित्तं द्रव्यं यस्य तं महोग्रं तेजस्विनं करोति तथा महोग्रा अतिक्रूरा मतिर्भवेत् आदि
मः प्रथमः शालकोवनिताभ्राता तानकुतः सोदरः स्वभ्राता तापि न भवेदित्यर्थः तथा विक्रमक्रियमाणोद्यमविपाके फलकाले तुच्छला
भो भवेत् तुच्छः स्वल्पो लाभो यस्येति ९ यदि मध्यभावदशमे भौमो मंगलस्तस्य कुले किं मङ्गलमपि तु स्वस्थ भौम एव कल्याणकार्ये सा
दिति अतिशयोक्तिः तथा ज्ञनैर्भ्रश्यैर्भूयते बहुभत्यः स्यादित्यर्थः असौ नरः स्वत एव स्वोद्यमादेव सिद्धः सपन्नकार्यो वनसीयते

महोग्रामतिर्भाग्यवित्तं महोग्रं तपोभावगो मंगलस्तं करोति भवेन्नादिमः श्यालकः सोदरो वा कुतो विक्र
मस्तुच्छलाभो विपाके ९ कुलेतस्य किं मंगलो मंगलो नो जनैर्भूयते मध्यभावे यदि स्यात् स्वतः सिद्धये वावनं
सीयते ऽसौ बलक्कोपि कंठीरवः किं द्वितीयः १० कुजं पीडयेत्सद्भभगोऽपत्यशत्रून्भवेत्सन्मुखो दुर्मुखो वापि प्रता
पात् धनैर्वर्द्धते गोधनैर्वाहनैर्वा स कृच्छ्रैन्यतार्थे च पैशून्यभावात् ११

लोके सुमंडुलायते तथा वराको दीनकुलोद्भवोपि द्वितीयः कंठीरवः । कः सिंहतुल्यपराक्रमः स्यादिति भावः १० लाभगः कुजो
भौम अपत्यानि शत्रूंश्च तान पीडयेत्तथा दुर्मुखः आक्रोशकोपि प्रतापात्तेजोधिकत्वात्सन्मुखो लोकदर्शनीयवत्सको
भवेत् गोधनैर्वाहनैर्वा निमित्तैस्तैरश्वगोम्बादिव्यापारेण धनपैशून्यभावाच्च गुणीति लोकप्रसिद्धादर्थैश्शून्यताद्रव्य ॰ निता व

च॰चिं॰

८

द्वादशोव्ययभावगः कुजः अर्थस्य द्रव्यस्य नाशं करोति तथा शतांशेऽपि लोहघातैः शस्त्रप्रहारैः क्षतांगो नयनकर्णोनर्तनेन स-

हवर्तमानः स्यात्स नरो शरिघातको भवेदिति भावः मृषा किं वदंति भयं मिथ्याजनश्रुतिभीतिर्दस्युतश्चोरात् द्वयं वा कलिः कलहो

भवेत्तथापारधी हेतुदुःखं भ्रस्यजं निजहेतुदुःखं विचिंत्य १२ इति चमत्कारचिंतामणिटीकायां कुजतन्वादिभावफलं अथ बुध

तन्वादिभावफलान्याह बुधो मूर्तिगो लग्नस्थोऽन्यरिष्टमन्यग्रहजनितदोषं मार्जयेन्नाशयेत् तथा वरिष्ठा धियः श्रेष्ठा बुद्धयः

शतांशेऽपि नत्सक्षतो लोहघातैः कुतो द्वादशोऽर्थस्य नाशं करोति मृषा किं वदंती भयं दस्युतो वा कलिं पारधी हेतुदुः

खं विचिंत्यम् १२ बुधो मूर्तिगो मार्जयेदन्यरिष्टं वरिष्ठा धियो वैखरीवृत्तिभाजः जनादिव्यचामीकरीभूतदेहाश्चिकित्सा

विदो दुश्चिकित्सा भवंति १ धने बुद्धिमान्बोधने वाहुतेजाः सभासंगतो भासते व्यास एव प्रभूदारताकल्पवृक्षस्सतद्बुधे

भेपय ते भोगतः षट्पदोयं ॥२॥

तेजनादिव्यचामीकरीभूतदेहा उत्तमस्वर्णनिभशरीराश्चिकित्साविदो भिषग्विद्याकुशला वैख-

रीवृत्तिभाजो वैखर्या लिखनव्यवहारेण वृत्तिं कुटुंबपोषणादिकां भजंति ते अथवा वैखरी वृत्तिमाश्रिता दुश्चिकित्सा दुःसाध्या भवंति १

धने द्वितीयभावे बुधे सत्ययं नरो बुद्धिमान् बाहुतेजा भुजप्रतापवान् सभासंगतः पंडितसमाजस्थो व्यास एव भासते शोभते इति रूपका

भाषाटीका ॥

एम:

Indira Gandhi National Centre for the Arts

षट्पदो भ्रमरः सर्वभोगादिविषयरसग्राहीत्यर्थः नह्यत्र कल्पवृक्षस्य पृथूदारता बहुदानशक्तिमत्त्वं बुधैः पण्डितैर्भण्यते वर्ण्यते २ तृतीये बुधे सति विद्यि
ज्ञां परां प्रजीविनां भिन्नतया स्निग्धेन परम्परकृतां कृपया कोविदानां हृत्तिं च बहारंशील्यं नि भजतीति समयोक्तः विनीतः शीलवान् सन् तु वंशानामव
श्यानां धियां स्वबुद्ध्यावशित्वं वशकारित्वमुपैति अनुजे भ्रातृभिर्लतावान् बल्लीभिर्द्रुमइवाश्रितो वेष्टितोऽस्तीति भोगं बहुविषयानुभवं भजेत् वा
अनंतरार्थः भोगानंतरमंते वयसि सन्न्यसेत् त्यजेत् विषयानिति शेषः यद्वा सहजैर्लताबदाश्रितः संकटे प्राप्ते विषयान्संवेदित्यन्वयः

बुधे द्विजन्मनां परमकृद्धिनशीतो वशित्वं धियां दुर्वंशानामुपैति विनीतोऽस्ति भोगं भजेत्सन्न्यसेद्वा तृतीयो नु
जैराश्रितोऽस्ति लतावान् ३ चतुर्थे चरेच्चंद्रजश्चारुमित्रो विशेषाधिकद्भूमिनाथांगणस्य भवेल्लेखकोलि
ख्यतेनानदुःकंतदाश्रितः पैतृकं नो धनं च ४ वयस्यादिमे पुत्रधर्मेनेति द्रव्यं वेश्मस्यमेघार्थसंपादयित्री ॥

३ चन्द्रजो बुधो यदि चतुर्थे चरेत्तदा चारुमित्रः सुहृद्भूमिनाथांगणस्य राजद्वारस्य विशेषाधिकृतः सर्वोध्यक्षो लेखकः शोभनवर्णले
खी भवेद्वा अथवा तदा शोभनवर्णलेखी भवेद्वा अथवा तदाश्रितः परैस्तदाश्रितानलेखाधिकारिभिस्तदुत्कंठतमुख निर्गतवाक्यं लि
ख्यते इति लिङर्थे लट् च पुनः पैतृकं पित्रोपार्जितं धनं नो भवेत् पितृधनाभावात्स्वार्जितधनादित्यर्थः ४ पंचमे रोहिणीयेरौहिणेय पत्यं ॥

Indira Gandhi National Centre for the Arts

च॰चिं॰ बुधोस्तिनस्यादिमवयसिपुत्रगर्भोनतिष्ठेत्तस्माज्जातश्चान्म्रियेत स्वपत्यंवास्यात् मेधाबुद्धिरर्थसंपादविनोद्र व्याजेनचतुर

९ साभिचारमभिचारैर्मारणोच्चाटनादिभिःसहवर्तमानंकेनवंछलंकियद्र परिमितंविद्यतइतित्रधैर्हेसविद्भिर्भण्यतेकथ्यतेइत्यर्थः

५ बुधेशत्रुभावेषष्ठस्थेसतिजनानांविरोधोजनैःकलहःरिपूणांनिरोधःप्रसह्यकाराग्रहस्थापनंत्र्यनिलानांत्र्यवरोधोवायु

नानद्दकोष्ठइत्यर्थःयतीनांसन्यासिनांप्रबोधोज्ञानंसंभवेदस्येतिशेषः तथासनरोनिधीनांद्रव्याकरणांसद्यायंव्यवहरति

बुधेभण्यतेपंचमेरोहिणेयेकियद्विद्यतेकेनवस्याभिचारं ५ विरोधोजनानांनिरोधोरिपूणांप्रबोधोमतीनां

वरोधोनिलानां बुधेसद्ययेव्यावहारोतिधीनांवलादर्थकृत्संभवेच्छत्रुभावे ६ सुतःशीतगोःसप्तमेसंयुत

स्याविधतेतथातुच्छवीर्यंचभोगे अनस्तंगतोहेमवद्देहेशोभानशक्नोतितत्संपदोवानुकर्तुं ॥ ७ ॥ ॥

विदधातीतिसःवलात्स्वसामर्थ्यादर्थकृद्द्रव्योपार्जकःसंभवेत् ६ सप्तमेनस्तंगतेउदितेशीतगोश्चंद्रस्यसुतेपुत्रेबुधेयुवसाहत्री

सन्मुखंपरंतुभोगेरतिसमयेतुच्छंस्वल्पकालस्थायिवीर्यवीजंचविधतेतथाहेमवत्सुवर्णतुल्यांदेहशोभांशरीरकांतिंतत्संपदः

स्वश्रियोवाअनुकर्तुमनुविधातुंनशक्नोतिनसमर्थोभवतीत्यन्वयइतिशेषः तस्यकांतिर्लक्ष्मीर्वाऽतिश्रेष्ठास्यादित्याशयः त्र्य

राम

Indira Gandhi National Centre for the Arts

रंध्रगेअष्टमस्थेराजपुत्रेचंद्रसुतेसतिशतंजीविनः शतायुषइहस्वदेशेदेशांतरेचविश्रुताविख्यातास्तेनरानृपाद्राज्ञःसकाशमृद्धि
ऋथाद्धावहारान्निधानंद्रव्यसंचयंयुवतुङ्गवंक्रीडनंस्त्रीकेलिमंतर्मनसिप्रीतिसुखंलभंतेप्राप्नुवंति ८ धर्मभेनवमस्थे
बुधेअतिश्रीमान् धर्मशीलोदीक्षितःसोमयाजीस्वर्धुनीस्नातकोगंगास्नानव्रतीतीभानुवत्कुलोद्योतकृत्स्ववंशप्रकाशको

शतंजीविनोरंध्रगेराजपुत्रेभवंतीहदेशांतरेविश्रुतास्ते निधानन्नयाद्धिक्रयाद्वालभंतेयुवत्तुङ्गवंक्रीड
नंप्रीतिमंतः ८ बुधे धर्मगे धर्मशीलोतिधीमान् भवेद्दीक्षितःस्वर्धुनीस्नातकोवा कुलोद्योतकृद्भानुवद्
भूमिपालात्प्रतापाधिकोबाधकोदुर्मुखानां ९ मितःसंवदेन्नोमितंसंलभेतप्रसादाद्विवेकारिसौराज्ये
वृत्तिःबुधेकर्मगेपूजनीयोविशेषात्पितुःसंपदोनीतिदंडाधिकारस्त १० विनालाभभावेस्थितेशजातंनला
भेनलावण्यमानृण्यमस्ति ॥ भूमिपाद्धान्नृपादपिप्रतापेनाधिकोदुर्मुखानांमुखरदुर्जनानांबाधकोहिंसकोभवेत्
९ कर्मगेदशमस्थेबुधेपितुःसंपदोविशेषात्पूजनीयोलोकमान्यनीतिदंडाधिकारत्प्रसादाद्विवेकारिनिग्रहानुग्रहव्रतीसौरा
ज्येशुभराज्यत्वेवृत्तिर्व्यवहारशीलोयस्यसः मितंसंवदेन्नवाचालःस्यात्नोमितंन्नपरिमितंन्नर्थाद्विद्यावराभ्यादिसंलभेत् १०
लाभभावेस्थितेभेशजातंनारापतिपुत्रंविनानलाभोद्रव्यादिर्नलावण्यं ॥

Indira Gandhi National Centre for the Arts

सुतेविद्यमानेसहायभूतापिनदानपरिणानस्यवभूतिर्धनसम्पृद्धिर्भवेदितिशेषः ५ रिपोर्गृहेवाक्यतोजीवेरुजार्तोरोगपीडि
तोपिशत्रुहंतात्वंशत्रुहननसामर्थ्यमेतिप्राप्नोतिवलादुद्धतोरणेनस्यकोजेतानकोजेतानकोपिपराजयकर्तेत्यर्थः मद्विष्यादि
भिः शर्मभोगभाववेज्जायस्यसनथामातुलानांननच्छर्मजननन्यामातुः रुजोरोगाः संभवेयुः ६ जामित्रभावेसप्तमेयस्यगुरुः
तस्यवल्लीमतिः विभूतिश्चधनादिसमृद्धिर्वल्लीवहुलाभामिनीनांकामिनीनांरतिः प्रीतिः सुरतेश्चवल्लीस्वस्यागर्वेचद

निदानेसुतेविद्यमानेपिभूतिःफलोपद्रवःपक्वकालेफलस्य ५ रुजार्तोजनन्यारुजःसंभवेयूरिपौवाक्य
तोशत्रुहंतत्वमेतिवलादुद्धतःकोरणेनस्यजेतामद्विष्यादिशर्मीननन्मातुलानाम् ६ मतिस्तस्यवल्लीविभूतिश्च
वल्लीरतिर्वैभवेभामिनीनामवल्ली गुरुर्वर्गदृष्ट्यस्यजामित्रभावेसपिंडाधिकोखंडकंदर्पएव ७ चिरंजीवसेत्पै
तृकेचैवगेहेचिरस्थायिनोमन्दहंतस्यदेहं चिरंनोभवेत्तस्यनीरोगमंगगुरुर्मृत्युगोपस्यवैकुंठगंता॥ ८॥

पिमानवान्सपिंडाधिकागोत्रजैः सवलश्चखंडसौंदर्यादिगुणपूर्णःकंदर्पःकामएवभवेदितस्यसर्वत्रान्वयः ७ यस्यमृत्यु
गोऽष्टमस्थोगुरुःसनरःपैतृकेगेहेपितृगृहेचिरंचिरकालंनोवसेन्नतिष्ठेत्वैकुंठगंतादेहांतेविष्णुलोकगामीवपुरेव
कारेणपार्थेनस्वदेहशरीरमपिमांतदृढहंकृतमपिगृहेनचिरस्थायिवहुकालमेकत्रावासश्चिरंजीविवानेत्यर्थः॥ ८॥ राम



Indira Gandhi National Centre for the Arts

तथातस्यांगंनिरोगंरोगरहितंचिरंनोभवेत् ८ धर्मगेनवमस्थेगुरौभूमीपतेवल्लभामदालस्यताप्रदनानववाधेनालस्येनच
धर्मवैगुण्यकारीसंध्यावंदनादिनित्यकर्मणोपिलोपकरेतिशेषः ९ ध्वजामंडलेध्वजाश्रोभितेजनाढ्येसभास्थानेचित्रशा
लेनानाचित्रसहितमाशालास्त्रीद्वारकाग्रहायस्मिंस्तन्मंदिरंभवनंपूर्वजेभ्योपिपितुस्तेजोधिकत्वमताप्याधिकत्वउभयेभ्यो
पिस्वस्यतेजस्वित्वमस्यादितिशेषःतथापुत्रकानांकर्मणासुखेनतुष्टोनभवेत् सुतद्वेषीस्यादित्यर्थःप्रत्यहंप्रतिदिनंप्र

चतुर्भूमिकंतद्गृहंतस्यभूमीपतेर्वल्लभोवल्लभाभूमिदेवाःगुरौधर्मगेवाधवाःस्युर्विनीताःसदालस्यतोध
र्मवैगुण्यकारी ९ ध्वजामंडपेमंदिरंचित्रशालंपितुःपूर्वजेभ्योपितेजोधिकत्वम् नतुष्टोभवेत्कर्मणापुत्रकानां
पचेत्प्रत्यहंप्रस्थसामुद्रमन्नम् १० अकंप्यंचलाभेगुरौकिंनलभ्यंवदंत्यस्यधीमंतमन्येमुनींद्राःपितुर्भीर
भक्तस्वांगजास्तस्यपंचपरार्थस्तदर्थोनचेहेहभवाय ॥ ११ ॥ प्रस्थंषोडशपलपरिमितसामुद्रंलवणंयस्मिंस्तच्चैतत्

परिमितमन्नंतन्महानसेपचेत्बहून्भोजयेदितिभावः इदंफलंदशमेगुरावितिप्रकरणात् ज्ञेयम् अथवाध्वजामंडपइत्य
त्रगुरौकर्मगेइतिवापाठः १० लाभेगुरौअतःकिमकंप्यंस्वर्णरत्नादिनलभ्यंअपितुसर्वंलभेत् अन्येप्रसिद्धाअष्टमुनी
द्राइंद्रादयोवैयाकरणास्तंधीमंतमस्तावधानंवावदंतिपितुर्भरिर्भक्तःपितुःपोषकस्तस्यस्वांगजाऔरसपुत्राः ॥ ॥

Indira Gandhi National Centre for the Arts

पंचस्युः नदर्शनदूनपरार्थः अन्यभोगायनैवभवायदानधर्मभोगार्थनभवेदित्यर्थः कार्पण्यंप्रस्यादितिभावः पितुर्भारभृत्वंस्व
१२ वर्गायसामितिपाठोवा ११ यस्यमयेद्द्वादशेजीवस्तस्यसाभिमानसगवेसद्व्यायपिकीदृशंयशोपित्वयश एवापरेषांवंच
नियामतिः साकीदृशीकिंतुकुबेरएववयेनार्थस्यपरमार्थरूपपरलोकस्यनाशोदृश्याद्द्रव्यहानिर्वासकीदृशोविधिरविधिरेवे
त्यर्थः भेत्रयः सवर्गवंधुविषयकभयः परवंचकत्ताअविधिनाद्रव्यत्यागएवएतेभवेयुः १२ इतिचमत्कारचिंतामणौगुरोस्तन्वा

यशः कीदृशंसद्व्यंयेसाभिमानेमतिः कीदृशीवंचनाचेत्परेषांविधिः कीदृशोर्थस्यनाशोहियेनत्रयस्तेभ
वेयुर्व्ययेयस्यजीवः १२ समीचीनमंगंसमीचीनसंगः समीचीनवह्वंगनाभोगयुक्तः समीचीनकर्मासमी
चीनशर्मासमीचीनमुक्तोयदालग्नवर्ती १ मुखंचारुभाषंमनीषापिचार्वीसुखंचारुचारूणिवासासिनस्य

दिद्वादशभावफलानिः अथभृगोस्तन्वादिद्वादशफलम् यदासमीचीनस्यानादिषड्कलाढ्यः शुक्रोलग्नवर्तीतदागंसुंदरंस
मीचीनसंगः सत्संगः समीचीनानांसौंदर्यचातुर्यादिगुणयुतानांवहूंगनानांवहुस्त्रीणांभोगेनयुक्तः समीचीनानिविशुक्तानि
कर्माणियज्ञदानादीनियस्यससमीचीनानि इहपरत्रवाविषयभोगात्मकतत्कर्मफलानियस्यसभवेदितिशेषः १ यस्यकु
ंवस्थितोधनस्थः पूर्वदेवस्यपूज्यः नस्यमुखंचारुभाषंसुवाणीकंमनीषापिचार्वीकुशाग्राधर्भिवाबासुखे ॥ ॥ राम



Indira Gandhi National Centre for the Arts

विषयजं चारु नानाप्रकारः वासांसि चारूणि विविधानि कुटुंबेन स्वजनेन किं चारु शोभा न अपितु न किंचित् चार्वंगी कामः सुविनिता
भिलाषः स्यान्न सुरितिमथ्यासंभवं शेषः २ यस्य दुश्चिक्यगस्तृतीयस्थो दानवानां गुरुः शुक्रस्तस्य स्त्रीजने रतिः प्रीतिर्नो बंधुनाशः
किमु न तत्सुखं तथा पुत्रसौख्यैः पूर्णो जातमनोरथो न सेनापतिरपि दानसंग्रामकाले कातरोऽशूरो भवेदिति सर्वत्र शेषः ३ यस्य तुर्यभा
वे चतुर्थे असुरेज्यो भृगुः समहितेत्वे उत्सविते पूज्यते वाऽधिको भवेत् रुष्टतुष्टैः क्रुद्धैर्दयालुभिर्वा निजैः स्वीयैः परैश्च जनैः किं यतो

कुटुंबस्थितः पूर्वदेवस्य पूज्यः कुटुंबेन किं चारु चार्वंगि कामः २ रतिः स्त्रीजने नस्य नो बंधुनाशो गुरुर्यस्य दुश्चि
क्यगो दानवानां न पूर्णो भवेत्पुत्रसौख्यैपि सेनापतिः कातरो दानसंग्रामकाले ३ महित्वेऽधिको यस्य तुर्येऽसुरेज्यो ज
नैः किं निजैश्चापरै रुष्टतुष्टैः किं यत्पोषयेज्जन्मतः संजनन्या अधीनार्पितोपायनैरेव पूर्णः ४ सपुत्रेपि किं यस्य शुक्रो
न पुत्रे प्रयासेन किं यन्न संपादितार्थः ॥ ऽधीनैः स्वाश्रितजनैरर्पितोपायनैर्दत्तोपहारैरेव पूर्णस्तृप्तः जन्मतः स्वजन्मारभ्य मा
तुः किं यदि परिमितं सन्मुखं पोषयेदतिशयेन कुर्यात् ४ यस्य पुत्रे पंचमभावे शुक्रो न सपुत्रेपि किं पुत्रजन्मफलं नेत्यर्थः येन न संपा
दितोर्थः सेन प्रयासेन परिश्रमेणापि किं सुदर्कं विशिष्टानरफलं ऐश्वर्यादिरूपं उदरस्तृप्तिमनः संतोषरूपं वादिनामंत्रमिष्टाशनाभ्यां मंत्र
जेपन मिष्टा ॥ हारेणावायदध्ययनात्कवित्वकाव्यकरणेमतिः न चेन्नाधीतेनापि किं अर्थात्पंचमे शुक्रे सफलं पुत्रजन्मार्थानकप्रयत्न

Indira Gandhi National Centre for the Arts

ऐश्वर्यकारकोमंत्रजपस्तुतिमनस्तोषकारकोतनमनोजनस्तामघीकाम्यकरत्वासामर्थ्याध्ययनंचभवेदित्यर्थः ५ दानवेज्येसुके शत्रुगेषष्ठ
स्थेसुधासिक्तअमृतसेवितअमरवद्दृढः अनिवारणीयइतियावत् सअयोदृमत्यागस्तोचोत्तमोभवेतांस्वतोजातिगुणक्रियाभिःश्रे
ष्ठोरिपुसन्मार्गद्वअध्ययप्रश्नभवेदित्यर्थः चपुनःसंपादितं कृत्यं कार्यंविपद्येतनश्येतमंत्रतःकुमंत्रात्तपेत्संतापमाप्नुयात्पूज्याद्गुरोःपू
जयावासौख्यंमनधत्ते ६ कलत्रेसप्तमस्थेशुक्रेसतिकलत्राद्वनितायाःसुखंकलत्राच्छ्रोणिप्रदेशान्नोसुखंकटिव्यथाभवेदित्यर्थः

क्षुद् कंविनामंत्रमिष्टाशनाभ्यामधीतेनकिंचेत्कवित्वेनशक्तिः ५ सदादानवेज्येसुधासिक्तशत्रुव्ययःशत्रुगे
चोत्तमौतौभवेतां विपद्येतसंपादितंचापिकृत्यंनपेन्मंत्रतःपूज्यसौख्यंनधत्ते ६ कलत्रेकलत्रात्सुखंनोकलत्रात्क
लत्रंतुशुक्रेभवेद्दलगर्भेविलासाधिकोगण्यतेचप्रवासीप्रयासाल्पकःकेनमुह्यतितस्मात् ७ जनःक्षुद्रवादीचिरंचारु
जीवेच्चतुष्यांत्सुखंदैत्यपूज्योददाति जनुष्यष्टमेकष्टसाध्योजयार्थःपुनर्वर्द्धतेदीयमानधनेन ८ ॥ कलत्रश्रोणिभार्ययोरित्य
मरकोशात् कलत्रंस्त्रीरत्नगर्भासप्रत्रगर्भाभवेत् विलासाधिकोऽतिक्रीडःप्रवासीविदेशेगमनशीलःप्रयासाल्पकःस्वल्पोद्यमोगण्यते
तथाकेनवातस्मात्पुरुषान्नमुह्यतितच्चातुर्यमोहिताःस्युरतसर्वे ॥७॥ जनुषिजन्मसमयेअष्टमेदैत्यपूज्यःशुक्रःचतुष्पदांगोश्वादीनांसुखंददाति
तुर्याक्षुद्रवादीदुष्टवक्ताचिरंबहुकालंचारुसुखेनैवजीवेत् जयोअर्थश्चकष्टसाध्योयत्नेनसाध्यः धनंऋणउत्तमर्णात्तेनाधमर्णायदीयमानंपुनर्वर्द्धते ८



Indira Gandhi National Centre for the Arts

त्रित्रिकोणे नवमे भृगौ नन्नगरे केपुरवायेपौरः पुरवासिनः कुसीदेन वृद्धिं जीविकया वृद्धिं नरदीरन् न केन स्तुरेतदधमर्णे व्यतिरिक्तान
संतीत्यर्थः तथा तस्य धर्मध्वजादेर्दांभिकत्वाद्धेतोर्गर्हं ज्ञायते प्रसिद्धेति शेषः सहोत्थादिभिर्ज्ञातभृत्यैः सौख्यशरीरसुखं च भवेदिति
शेषः धर्मध्वजी लिंगवृत्तिरित्यमरः लिंगं तद्धर्मिवेषधारिणं ९ कर्मगो दशमस्थो भृगुर्गोत्रवीर्यवशात् बीजात् संतानबीजं किंवा न हृ
एद्धि आत्मीयः स्वकीय एव भ्रमो नीति विस्मरणरूपं क्रियते विक्षेपक्षयार्थं द्रव्यनाशनाय न वा किं प्रत्यहं विप्रवृत्त्या ब्राह्मणजीविकया

भृगौ त्रित्रिकोणे पुरे केन पौरः कुसीदेन यो वृद्धिमस्मै ददीरन् गर्हं ज्ञायते तस्य धर्मध्वजादेः सहोत्थादिसौख्यं
शरीरे सुखं च ९ भृगुः कर्मगो गोत्रवीर्यैः कराद्धि स्वयार्थे भ्रमः किं न आत्मीय एव तुलामानतो हारकं विप्रवृत्त्याजनानां
डंबरैः प्रत्यहं वा विवादात् १० भृगुर्लाभगो लाभदो यस्य लग्नात्तु रूपं महीपं च कुर्याच्च सम्यक् कुलसत्कीर्ति सत्यानुरागं
गुणाढ्यं महाभोगमैश्वर्ययुक्तं सुशीलं ११ ॥ जनाडंबरैः प्रतिष्ठार्थं स्थापितपारिपार्श्वकैर्विवादाद्धारकं सुवर्णं तुलामानतः शत
पलपरिमितं न वा किमपि तुल्यं फलं सर्वं स्यादेवाजानकीय प्रवृत्तिरिति पाठे तुलामानतः सकलसमानेन जानकीयापित संबंधिनी प्रवृत्ति
वृत्तिर्न किं १० यस्य लग्नात् लाभग एकादशस्थो लाभदो द्रव्यलाभकारी भृगुस्तं नरं सुशीलं गुणाढ्यं गुणैर्युतं कुलसत्कीर्तिसत्यानुरागं की
र्तिसत्यवाक्यलोकरंजनादिभिः शोभितं महाभागं उत्तमभाग्यवंतं ऐश्वर्ययुक्तं प्रभुत्वाढ्यमेनाहरंशं सम्यक् महीपं राजानं कुर्यात् बलनाशं तस्मात्स्वार्थे

Indira Gandhi National Centre for the Arts

ह्वादशेसितः शुक्रोऽसौकेलिसत्कर्मशर्म्मक्रीडासद्यायजनितसौख्यंगुणानांकीर्तिश्चस्वयंनाशंमित्रवैरंजनानांविरोधंकलहंसदाक

१४ रोतितथाकश्चापिचित्तमेतिधनंप्राप्नोतिपित्तंविलीयेतलीनस्यात्कफाधिक्यंस्यादित्यर्थः नित्यमितिक्वचित्पाठः सुगमः १२ इति

वमत्कारचिंतामणौभृगोस्तन्वादिभावफलम् अथशनेस्तन्वादिद्वादशभावफलान्याह तनुस्थेलग्नगेऽर्कजेशनौधनेनाति

पूर्णः अतितृष्णसंतोषहीनविषादिश्चअप्रसन्नस्थूलदृष्टिः सूक्ष्मविचारासमर्थः दृष्टिजंविषंदृष्टेर्वैरिप्रनाशकः आधिंमानसंदुः

कदापश्येतिविज्ञंविलीयेतपित्तंसितोद्वादशेकेलिसत्कर्मशर्मगुणानांचकीर्तिःस्वयंमित्रवैरंजनानांविरोधसदा

साकरोति १२ धनेनातिपूर्णोतितृष्णोविषादीतनुस्थेर्कजेस्थूलदृष्टिर्नरःस्यात् विषंदृष्टिजंत्वाधिरुग्व्याधिबाधा

स्वयंपीडितोमत्सरावेशएव १॥सुखापेक्षयावर्जितोसौकुटुंबात्कुटुंबेशनौवस्तुकिंकिंनभुंक्ते सखंवक्ति मित्रेणाति

क्तंवचोपिप्रसक्तिंविनालोहकंकोलभेत २॥ स्वकरोतीतिरुग्व्याधिबाधावातदापीडामत्सरावेशः परोत्कर्षासहिष्णुःस

नस्वयमेवपीडितउद्वेगवान्स्यात् १ कुटुंबेद्वितीयेशनौऽसौपुरुषःसुखापेक्षयासुखलाभेच्छयाकुटुंबात्स्वजनाद्वर्जितोवियुक्तःअन्य

देशप्राप्तइत्यर्थः किंकिंवस्तुनभुंक्तेअपितुसर्वविषयभोगवान्स्यात् तथाप्रसक्तिपरिचयंविनालोहकघटितंशस्त्रपातादिअष्टधा

तुवासुवर्णवाहिरण्यलोहमित्यादिनिघंटूक्तेःकोलभेतकिंसएवेत्यर्थः मित्राणिसत्यसार्द्धमितिक्तंदुःसहंवचोवाक्यंवक्तिवदति २



Indira Gandhi National Centre for the Arts

तृतीयेशनौजनात्सहजादेरुद्यमात्पराक्रमाच्चचित्तं मनः शीतलं शांतं नैवजायते भाग्यलाभाद्यदृष्टं अविघ्नंविघ्नरहितं नकर्हिंचित्॥
कदापिनैवभवेत् युक्तभाषीमितवक्तादृढाशोऽचलतृष्णः अतएवासुखी सत्कृतोपिदुर्मुखोमुखरोभवेत् ३ चतुर्थेशनौपैतृकं
पितृसंबंधि धनंमंदिरंगृहं दूरंयातिनास्यस्वगृहेहस्तगंस्यात्॥ बंधुवर्गापवादोबंधुनिंदा गृहेवाहनेहानयोगाशागृहहानिर्वाहन
हानिश्चपितुर्मातुश्चापिसंतापकारी वातरोगीस्यादितिशेषः ४ पंचमेशनौप्रजाहेतुदुःखीसंताननिमित्तंक्लेशभागीविभूतिर्द्धनसमृ

तृतीयेशनौशीतलंनैवचित्तंजनादुद्यमाज्जायतेयुक्तभाषीअविघ्नंभवेत् कर्हिचिन्नैवभाग्यं
दृढाशोसुखीदुर्मुखःसत्कृतोपि ३ चतुर्थेशनौपैतृकंयातिदूरं धनंमंदिरंबंधुवर्गापवादः पितु
श्चापिमातुश्चसंतापकारीगृहेवाहनेहानयोवातरोगी ४ शनौपंचमेचप्रजाहेतुदुःखीविभूतिश्चलातस्य
बुद्धिर्नशुद्धा रतिर्दैवतेशब्दशास्त्रेनतद्वत्कलिर्मित्रतोमंत्रतःक्रोडपीडा ५ ॥ द्विश्चला अस्थिराबुद्धिर्नशुद्धाकु

टिलेत्यर्थः देवतेदेवविषयेधर्मशास्त्रेधर्मप्रतिपादकेवेदस्मृत्यादौनरतिः प्रीतिर्विश्वासइतियावत् तद्वन्मंत्रतोविचारविषयेमित्रतोमित्रे
णाकलिः कलहः क्रोडपीडाकुक्षिविषयेक्लेशस्तस्यस्यादितिशेषः ५ यस्यषष्ठेरिपुभवेनेद्रनस्यसूर्यस्यपुत्रोयदिभवेत् तस्यारेःशत्रोर्भूपतेरा
ज्ञश्चौरतःसकाशाद्भीतयः किमपितुबलेनेत्यर्थः युद्धेरणेवादेयोद्धाप्रतिवादीसन्मुखोनभवेत् बलाद्बुद्धितःकोरणेतस्यजेताइतिवापाठः

Indira Gandhi National Centre for the Arts

सुगमार्थः महिष्यादिकसोरिभप्रभ्रातिचतुष्पात्सुखमातुलानां॥विनाशश्चभवेत् ६ शनौद्यूनगेसप्तमस्थेसुदाराः शोभनस्त्रियःचारुमिंत्र
सुहितकारिचारुवित्तंअन्यायवर्जितं धनंचिरंवहुकालंनसहेत्तत्सुखंनभवेदित्यर्थः दंपतीस्त्रीपुरुषावपिरोगयुक्तौस्यातामितिशेषः त
थान्अनुत्साहतः तापकृत्निरंतरंअनुत्साहीहेतौ॥नचेताहीनंचेतोमानसंयस्यसः विह्वलः अकिंचित्करः लोलुपः अतितृष्णः कृतोवीर्य
वान्स्यादितिसर्वत्रसंवंधः ७ रंध्रगेअष्टमस्थेशवनोपाधिकानामुपाधिरहितानांजनानांवियोगः सत्संगाभावइत्यर्थः धनानांविनाशे

अरेर्भूपतेश्चोरतोभीतयः किंयदीनस्यपत्रोभवेद्यस्यशत्रोनयुद्धेभवेत्सन्मुखस्तस्ययोद्धामहिष्यादिकंमातुला
नांविनाशः ६ सुदाराःनमित्रंचिरंचारुवित्तंशनौद्यूनगेदंपतीरोगयुक्तौ॥वियोगोजनानांत्वनोपाधिकानां
विनाशोधनानांसकोयस्यनस्यात् शनौरंध्रेगव्याधितःसुहृद्दर्शीतदग्रेजनःकेतवंकिंकरोतु ८ मतिस्तस्य
तिक्तानतिक्तंतुशीलंरतिर्योगशास्त्रेनुगुणोराजसःस्यात् सुहृद्दुर्गतोदुःखितोदीनवंध्याश्रनिर्धर्मगःशर्मकृत्स

यस्यनस्यात् सकः तथाव्याधितःसुहृद्दर्शीपरदोषान्वेषीतदग्रेन्याजनः केतवंधूर्ततांकिंकरोतुमहाधूर्तोऽपिधूर्तंवित्स्यादितिभावः ८
शनिर्धर्मगोनवमस्थश्चेत्तस्यमतिस्तिक्ताविषयविरक्ताशीलंतुनतिक्तंकटुकंयोगशास्त्रप्रतिपादकग्रन्थेरतिरभ्यासोराजसोगुणोर
जःप्रकृतिर्दीनवंध्याएतेदीनामित्रवंधुवर्गाइत्यवंरूपयासुहृद्दुर्गतोदुःखितःकृपालुत्वात्खिन्नमनाअतएवशर्मकृत्सर्वेषांसुख राम
कारीस्यात् संन्यसेह्यायतिरेववास्यात् ९ यस्यकर्मगादशमस्थोमंदस्तस्यमातामाताग्गीमातुरभावेनतस्याएवदुग्धपानंस्यात्वाहुरेवस्त १५

Indira Gandhi National Centre for the Arts

भुजएव धनोपार्जकत्वेन पिता वाल्पएव तत्पित्रो नीरोगो भवेदिति भावः तथाऽऽधिपत्यात्कोपयालुत्वादेर्हेतोर्वृथा निष्कारणं सर्वतः
सर्वेषु लोकेषु दुष्टकर्मताडनदंडनादिश्रानैः क्रमेण विग्रहे जयः सर्वसुखमेधते वर्द्धते जीविका जीविनवृत्तिस्तु स्वल्पैव तनत्वादिति
भावः १० सुवाधार्थे दशमस्थशनेर्मतांतरमाह व्योमगे दशमस्थे शनौ माता सुखं विंदते किं पित्रा जनकेन च शैशवं शिशोर्भावं बालक्री
डनादि दृश्यते किंतु तनेत्यर्थः तथा तत्पित्रास्या पितो निधिर्द्व्याकरः स्वयं वा पिता सुवीजे रुत्पादिता कृषिश्च दृश्यते दृश्यनिमित्ते

अजातस्य माता पिता वा हरेद्वा वृथा सर्वतो दुष्टकर्माधिपत्यात् शनेरेधते कर्मगः शर्म मंदो जयो विग्रहे जीविकानां
तु मस्य १० शनौ व्योमगे विंदते किंच माता सुखं शैशवं दृश्यते किंतु पित्रा निधिः स्यात् पितो वा पिता वा कृषिश्च प्रणश्येत्
वदृश्यते देवतो वा ११ स्थिरं वित्तमायुः स्थिरं मानसं च स्थिराणेव रोगादयो न स्थिराणि अपत्यानि शूरः शतादेकएव
वप्रपंचाधिके लाभगे भानुपुत्रे १२ व्ययस्थो यदा सूर्यसूनो नरः स्यादशूरोऽथवा निस्त्रपो मन्दनेत्रः प्रसन्नो वहि
र्गेहे लग्नपश्च व्ययस्थारिपक्षध्वंसकृच्चरत्नभोक्ता ॥ १२ ॥ न स्वचक्रपरचक्रादिना देवतो जलाग्न्यादिभयेन वा ध्रुवं नि
श्चितं प्रणश्येत् १० लाभगे भानुपुत्रे वित्तं स्थिरं निखिलमायुः स्थिरं बहुलं मानसं च स्थिरं स्वस्थं रोगादयो नैव स्थिरा आरोग्यं स्यादित्यर्थः
अपत्यानि संतानानि न स्थिराणि संतानशोकः स्यादिति भावः शतावधि नरसंख्यमनुष्येभ्योपि प्रपंचाधिकः रागद्वेषोपायैर्विशिष्ट एको मु
ख्यः शूरश्च स्यात् सुरितियथार्थशेषः ११ व्ययस्थे द्वादशगे यदा सूर्यसूनौ शनौ अशूरः कातरो न निर्भयः निस्त्रपो निर्लज्जः मंदनेत्रो मंद

Indira Gandhi National Centre for the Arts

हस्तीःवहिःपरदेशेप्रसम्भोगःहेनोप्रसन्नदुत्पर्थःचपुनर्लीसंपोलग्रनाथोव्ययमश्चोद्वादश्रस्थानगतःसनरिपुर्ध्वंसकृत्तन्तुनाशकरःस्य.



त्रभोक्तायत्तद्र्व्येनवैभवसम्राट्सूरिनिशेषः १२ इतिचमत्कारचिंतामणिटीकायांशनेस्तन्वादिद्वादशभावफलानि अथराहोस्तन्वादिन
वफलं यस्यलग्नेतमोराहुःसनरोभग्नारिवीर्यःपराजितशत्रुःस्ववाक्पालनेपरेषांप्रतापात्स्वतेजसानसमर्थःपरेषांप्रभावात्स्वान्
स्वातिशयान्परार्थाश्चआच्छादयेत् आत्मसात्करणंकुर्यात् भूरिदारोवहुस्त्रीकोपिकलत्रेस्त्रीविषयेत्र धृतिंअसंतोषंयायात्

स्ववाक्येसमर्थःपरेषांप्रतापात्प्रभावात्समाच्छादयेत्स्वान्परार्थान् तमोयस्यलग्नेसभग्नारिवीर्यःकलत्रे
धृतिंभूरिदारोपियायात् १ कुटुंवेतमोनष्टभूतंकुटुंवंमृषाभाषितंनिर्भयोवित्तपालःस्ववर्गप्रणाशोभ
येच्छस्त्रतश्चेदवश्यंपरखलेभ्योलभेत्पारवश्यम् २ ननागोयसिंहोभुजोविक्रमेणप्रयातिहसिंहीसुतेतत्समत्वं॥

कामाधिकःस्यादितिभावः १ कुटुंवेद्वितीयेतमोराहुश्चेत्कुटुंवंस्ववंधुजनंनष्टभूतंदुर्जनंच अतएवखलेभ्योदुष्टजनेभ्योहेतोरवश्यंपा
रवश्यंपराधीनत्वंकारागृहनिवासित्वंवाशस्त्रतोभयंचलभेत् तथामृषाभाषितंमिथ्याभाषितंनिर्भयोभयरहितोवित्तपालोद्रव्यरक्षकः
कृपणइतियावत्स्ववर्गप्रणाशोवंधुनाशोभवेदितिशेषः २ इहजन्मनितृतीयेसिंहीसुतेराहौभुजाविक्रमेणबाहुवलेननागोहस्तीअ राम
पवासिंहस्तत्समत्वंतुल्यतांनप्रयातिजगच्चलोकंसोदरत्वंभ्रातृभावंसमेतितथाभाग्यंप्रयातोपिप्राज्ञभाग्योपियत्नहेतुःयत्नस्योद्य १६

Indira Gandhi National Centre for the Arts

मः हेतुः कारणं कृतः कथं स्याद् लाभो भवेदित्यर्थः ३ चतुर्थे असुरो राहुश्चेन्मातृनैरुज्यदेहो मातुर्देहारोग्यं कथं स्यान्नेत्यर्थः हृदि ज्वालया
मनः संतापेन वह्निः शरीरमपि शीतलं किं स्यात् स्वयं च व्याधियुतः स्यादित्यर्थः अथ मेषगो कर्कगो मेषवृषकर्क राशिस्थो बुधर्क्षे कन्यामिथुनयोर्वा
स राहुश्चेदन्यथा नमफलदः स्तदेवाह भूपतेर्वै धुरेव अतिप्रियः स्यादिति पूर्वेणान्वयः ४ सुते पंचमभावे सिंहिकायाः सुतो राहुः स्तत्सुतोत्थानि
कृतं भामिन्याः सक्रोधायाः वनितायाश्चिंतया चिंततापः कोपनाऽसि च भामिनीत्यमरः क्रोडरोगे कुक्षिमाद्यो सति आहारस्य हेतुः कारणं औ

तृतीये जगत्सोदरत्वं समेति प्रयातोपि भाग्यं कृतोयत्नहेतुः ३ चतुर्थे कथं मातृनैरुज्यदेहो हृदि ज्वालया
शीतलं किं वह्निः स्यात् सचेदन्यथा मेषगो कर्कगो वा बुधर्क्षे सुरो भूपतेर्वै धुरेव ४ सुते नत्सुतोसति कृत्सिं
हिकायाः सुतो भामिनी चिंतया चिंततापः सति क्रोडरोगे किमाहारहेतुः प्रपंचेन किं प्रापकाद्दष्टवर्जं ५ बलं
बुद्धिवीर्यं धनं तद्दशेन स्थितो वैरिभावे पिये षां जनानाम्॥

ष्यादिकं नकिमपि अर्थो कुक्षिरोगो अग्निमांद्यं च कार्यो ला
प्रापकाद्दष्टवर्जं लाभकारदैवं विना प्रपंचेन पत्नविस्तारेण किं प्रयासो भूयात् स्वल्पलाभश्च भवेदिति सर्वत्र शेषः ५ येषां जनानां वैरिभावे
षष्ठे स्थितो राहुस्तद्रिपूणाम् अरणाय॥ मपि देहे देवशत्रुसंघानं नाशयेदित्यर्थः तथा बलं देहिकं बुद्धिवीर्यं चातुर्यं तद्दर्शनं बला द्वासि [illegible]
शाद्धनं धनार्जनं स्थिरं मानसं नो मातुलाः पितृव्याश्च नो मनश्च बलं मान[illegible] तसंबंधाभावश्च स्यादिति सर्वत्र शेषः ६ द्यूने सप्तमे [illegible]

Indira Gandhi National Centre for the Arts

च॰चिं॰
१७

सदैंराहुश्चेल्लग्नहस्थापितवरिलग्निशेषः जातवेदाः अग्निर्यथा लोडये संतापयेदेवंविधातुः याकादिनाहजातोरोगेणनष्टुवलो
विनाशंलभेयुः तथावियोगायवादः वियोगाः वंधुविश्लेषुदुःखानि अपवादालोकनिंदाशंमशांतिनप्रयाति ७ रंध्रगोष्टमस्थोत्र ध्रः
राहुः श्रमग्रंथिकृतश्रमेण वहुप्रयासेनग्रंथिंवानगोलकं करोतीतिकृतत्वपुनस्तंनरंजनास्त्यजेत्तिययाजनकस्यदंजान
कंधनंपितद्रव्यंनृपैः राजभिः पंण्डितैश्चवंदितः पूजितः स्वजनैर्निंदितश्चभाग्यलाभः सकृदेकवारमेवभ्रंशः कार्यहानिरसकृ

रिपूणामरण्यंदहेदेवराहुः स्थिरंमानसंमातुलानोपित्वम्याः ६ विनाशंलभेयुर्द्युनेतद्युवत्योरुजाधातुपाका
दिनाचंद्रमर्दीकराहेयथालोडयेज्जातवेदावियोगापवादाः शमन्नप्रयाति ७ नृपैःपंडितैर्वंदितोनिंदितः
स्वैः सकृद्भाग्यलाभोसकृद्भ्रंशएव धनंजानकंतंजनाश्चत्यजंति श्रमग्रंथिकृद्रंध्रगोत्रधराहुः ८ मनीषीकृते ॥ ६ ॥
नत्यजेद्बंधुवर्गंसदापालयेत्सूजितः स्याद्गुणैः स्वैः सभाद्योतकोयस्यचेत्रित्रिकोणेतमः कौतुकोदेवतीर्थेर ॥

स्तुहर्भवेदितिशेषः ८ यस्यत्रित्रिकोणेनवमेराहुश्चेत्सनरोमनीषीवुद्धिमान्स्वैर्गुणैः पूजितोदयालुर्दयावान् देवतीर्थेकौ
तुकीसभायांद्योतकः प्रकाशकः स्यात्कृतमुपकारंनत्यजेत्सदावंधुवर्गंपालयेत् ९ खगेद्दशमस्थेत्रगोराहोसति
श्रमोजनोमदेश्रवधानसमयेअर्थव्यतीक्रूरकर्मात्रनएवजनैर्व्याकुलः सुखंनाधिशेनेशयनंकुर्यात्सदाम्लेच्छसं

एम॰
१७

Indira Gandhi National Centre for the Arts

सर्गतो अतीवगर्वं उच्चैर्मानिनीकामिनीभोगं मानवतीस्त्रीरतिसुनर्मा लभेत् १० लाभगस्तमोराहुश्चेत्सुतोत्पत्तिसौख्यं सदाम्लेच्छ

संसर्गतो अतीवगर्वं उच्चैर्मानिनीकामिनीभोगं मानवतीस्त्रीरतिसुनर्मा लभेत् १० लाभगस्तमोराहुश्चेत्सुतोत्पत्तिसौख्यं सदाम्ले

च्छतोर्थद्रव्यं चलभेत् साभिमानः किंकरेणासेवकेन चरेत् भृत्यैर्विना न कुत्रापि गच्छेदित्यर्थः विदेशं किं व्रजेत्किमर्थं गच्छेत् त

द्गृहस्थित एव सर्वतो लभेदिति भावः धूर्तानां वधो मित्राणि यस्य सः धूर्तानां वधुवर्गत एवान र्थोपि पैशून्येन सर्वानर्थकारी परार्थान्न

सदाम्लेच्छसंसर्गतो तीव गर्वं लभेन्मानिनीकामिनीभोगमुच्चैः जनेर्म्या कुलो सौ सुखं नाधिशेते भदेश्यम

धीक्रूरकर्मा गगेऽगो १० सदाम्लेच्छतोर्थं लभेत्साभिमानश्चरेत्किं करेणाव्रजेत्किं विदेशं परार्थानन र्थो

हरेद्धूर्तवधः सुतोत्पत्तिसौख्यं तमो लाभगश्चेत् ११ तमो द्वादशे दीनतां पार्श्वशूलं प्रयत्ने कृते न र्थतामान

नोति खलैर्मित्रतां साधुलोके रिपुत्वं विरामे मनोवांछितार्थस्य सिद्धिः १२ ॥

हरेद्धूर्तिपात् तन्दियासर्वे द

इतीत्याशयः ११ द्वादशे तमो दीनतां पार्श्वशूलं क्रोडेवात पीडां खलैर्मित्रतां साधुलोके सज्जनेरिपुत्वं प्राप्नुत्वं भावे प्रयत्ने कृते

ऽनर्थतास्वस्थकार्यवैपरीत्यपरिणामे मनश्चिन्तितार्थस्य सिद्धिमातनोतीत्यस्य सर्वत्रान्वयः १२ इति चमत्कारचिंतामणि

टीकायां राहोस्तन्वादिद्वादशभावफलं १२ अथ केतोर्भावफलान्याह यस्य जन्मकाले शिखी केतुः तनुस्थो लग्नस्थः बांधवे १८

Indira Gandhi National Centre for the Arts

व॰चिं॰ स्मान्नाभिः क्लेशकर्त्ता कलहकारकः दुर्जनेभ्यो दुष्टजनेभ्यो भयं व्याकुलत्वं मनोव्यग्रता कलत्रादिचिंता सदोद्वेगता च देहे शरीरे
१८ देहे मारुती वायुसंबंधिनी पीडा अनेकप्रकारा स्यादित्यर्थः १ धने द्वितीये केतुश्चेत्तदा धने द्रव्यविषये नरेशाद्राज्ञः सकाशाद्व्य
ग्रता धान्यस्य आश्रितस्थानस्य नाशः मुखरोगकरः कुटुंबात्मिजादिभिर्विरोधः किं सत्कृतवचः शोभनवाक्यम पिन स्यात् गेहे मेषगोते
सौम्यगेहे कन्यामिथुनयोरिति सौख्यं भवेदिति सर्वत्रान्वयः अत्र श्लोकद्वयेपि यदा लग्नगाः केतवः इति धने केतवः इति बहुव

तनुस्थः शिखी बांधवैः क्लेशकर्त्ता तथा दुर्जनेभ्यो भयं व्याकुलत्वं कलत्रादिचिंता सदोद्वेगता च शरीरे व्यथानेकधा
मारुती स्यात् १ धने केतुरव्यग्रता किं नरेशाद्धने धान्यनाशो मुखरोगकृच्च कुटुंबाद्विरोधो वचः सत्कृतं नो भवेत्स्वे गृहे
सौम्यगेहे तिसौख्यं २ शिखी विक्रमे शत्रुनाशं विवादं धनं भोगमैश्वर्यसेजोधिकं च सुहृद्वर्गनाशं सदा बाहुपीडा
भयोद्वेगचिंताकुलत्वं विधत्ते ३ चतुर्थे न मातुः सुखं नो कदाचित्सुहृद्वर्गतः पैतृकं नाशयेत्तं शिखी बंधुवर्गात्सु
खस्वोच्चगेहे चिरं नो वसेत्स्वे गृहे व्यग्रता चेत् ४
चनपाठश्चिंत्यः केतुसंज्ञयोः संपातयोरेवराहुकेतुसंज्ञायास्यात्तग्रहत्वेन सिद्धांतोक्तैरेकवचनस्यैवोचितत्वाल्लोके तु नाम संहितो
क्तेर्बहुत्वं तत्तत्तात्पर्यविषयज्ञेयमिति २ विक्रमे तृतीये शिखी केतुश्चेत्तदा भोगविषयसुखमैश्वर्यं तेज एतत्रयमप्यधिकं शत्रुनाशं पु
नर्विवादं सुहृद्वर्गनाशं बाहुपीडा सदा भयोद्वेगचिंताभिराकुलत्वं विधत्ते ३ चतुर्थे शिखी चेन्मातुर्नो सुखं सुहृद्वर्गात्कदाचिन्नो सुखं राम
१८

Indira Gandhi National Centre for the Arts

पितृकं पितृसंबंधि धनादिवस्तुनाशभीतिः स्वगृहे चिरं नो वसेत् ० वासश्चेद्दाग्रतान्याकुलत्वं स्वोच्चगेहे स्वोच्चे धनुषि स्वगेहे मीने शि
खिवंधुवर्गानन्तसुखं भवेदिति शेषः सर्वत्र ४ पंचमे राहुपुच्छे केतुः प्रयाति तदा सोदरे भ्रातृविषये घातवानादिकष्टं घातो नशस्त्रघाना
दिना वातादिरोगेण वा क्लेशः स्वबुद्ध्या मथापीडा स्वल्पपुत्रा स्यात्संततिः स नरो वीर्ययुक्तोऽपि दासो भवेदित्यस्य सर्वत्रानुषंगः ५ षष्ठभावे न
मसो राहोः पुच्छभागे पुच्छे केतौ वित्यर्थः गते सति मातुलान्मानसह जान्मानभंगः स्वोदरहानिः रिपूणां विनाशश्च तुष्यद्गोमहि

यदा पंचमे राहुपुच्छं प्रयाति तदा सोदरे घातवातादिकष्टं स्वबुद्धिभ्रमथा संततिः स्वल्पपुत्रः सदा दासो भवेद्वी
र्ययुक्तो नरोऽपि ५ तमः पुच्छभागे गते षष्ठभावे भवेन्मातुलान्मानभंगो रिपूणां विनाशश्च तुष्यात्सुखं तुच्छ
चित्तं शरीरे सदानामयं व्याधिनाशः ६ शिखी सप्तमे भूयसी मार्गचिंता निवृत्तस्वनाशोऽथवा वारिभीतिः भवे
त्कीटगः सर्वदा लाभकारी कलत्रादिपीडामयो मग्नतावेत् ७ गुदे पीडते ऽर्शादिरोगैः स्वकंप्यं भयं वाहनादेः

ष्यादिना वा सुखं तुच्छं चित्तं हीनमनस्त्वं शरीरे सदा अनामयं आरोग्यं व्याधिनाशश्च भवेत् ६ सप्तमे शिखी चेन्मार्गचिंता
भूयसी वह्वी निवृत्तधनस्य नाशोऽथवा वारिभीतिर्जलभयं कलत्रादिपीडामयः अर्थस्य भग्नता मनसः कीटगो वृश्चिकराशि
शिस्थः केतुश्चेत्सर्वदा लाभकारी भवेत् ७ अष्टमे राहुपुच्छे केतौ सति गुदे अर्शादिरोगैः स्वकंप्यं पीडनं वाहनादेर्भयं स्याद्

व्यस्य रोध इत्यत्र छंदोभंग त्वाद्वस्तूनांविरोध इत्यवपाठः कीरकन्याजगोयुग्मगेतुच्चे वृश्चिककन्यामेषवृषमिथुनस्थेकेतौसदार्थ
लाभोभवेदित्यर्थः ८ यदाधर्मभावेनवमेशिखीतदानींसहोस्थानांभ्रातॄणांपीडान्यथावाहुरोगंभुजेव्याधिः तपोदानतोहास्यंवृत्तिः
ततपसादानेनलोकोपहास्यतांविधत्तेतथाक्लेशनाशः म्लेच्छतोभाग्यवृद्धिः सुतार्थीचभवेत् ९ यदाकर्मगोदशमस्थोयस्यकेतुस्तदा
तदुर्भगंअसुंदरंकष्टभाजंक्लेशभागिनंजातुकदाचिद्वाहनेवाहननिमित्तंपीडितंपितुर्नोसुखंदुःखमित्यर्थः जन्मनिवृषमेषद्व

स्वद्रव्यस्यरोधः भवेदष्टमेराहुपच्छेर्थलाभः सदाकीरकन्याऽजगोयुग्मगेतु ८ शिखीधर्मभावेयदा
क्लेशनाशः सतार्थीभवन्म्लेच्छतोभाग्यवृद्धिः सहोत्थव्यथांवाहुरोगंविधत्तेतपोदानतोहास्यवृद्धिंतदा
नी ९ पितुर्नोसुखंकर्मगोयस्यकेतुस्तदादुर्भगंकष्टभाजंकरोति तदावाहनेपीडितंजातुजन्मवृषाजालि
कन्यासुचेच्छत्रुनाशं १० सुभाग्यः सुविद्याधिकोदर्शनीयः सुगात्रः सुवस्त्रः सुतेजोपित्तस्यदरेपीडनंतस्

वृश्चिककन्यासुचतच्छत्रुनाशंकरोतीतिसर्वत्रान्वयः १० लाभगः शिखीकेतुः सर्वेषांवस्तूनांलाभंकरोतितथासनरः सुभाग्यः
सुविद्याधिकः सुगात्रः शोभनांगः अतएवदर्शनीयोमनोहरः सुतेजाः श्रीमनप्रतापः सुवस्त्रोपिदितिशेषः तस्यसंततिदुर्भगा
भाग्यहीनोदरेभयेपीडनंतेच ११ रिष्फगोद्वादशस्थः असौशिखीकेतुर्नरंसदाराजतुल्यंराजवत्सुखकारिणंभद्व्ययसन्मार्गे



Indira Gandhi National Centre for the Arts

धनव्ययकरं रोगेन द्रिपूर्णा विनाशं वस्तिगुह्यांघ्रिनेत्रे वस्तिर्नाभेरधोभागः गुह्यं लिंगं अंघ्री पादौ नेत्रे च एषां द्वंद्वैकवद्भावस्त
स्मिन् रुजा रोगेण पीडनं व्यथा मातुलात् शर्म सुखं नैव करोतीति सर्वत्रान्वयः १२ इति चमत्कारचिंतामणिटीकायां केतोस्त
न्वादिभावफलमिति अथ ग्रंथस्तुतिपूर्विकां स्वप्रौढिमाह चमत्कारचिंतामणेर्ग्रंथे भट्टनारायणेन जन्मकुंडलिकायां जा
नकोक्तभावजं यत्फलं कीर्तितं कथितं यो द्विजः पठेद्राज्ञां सभायां तस्य समक्षे तन्निकटे प्रवक्तुं अन्ये नैव समर्था भवंतीति शेषः

नति दुर्भगांश्च शिखी लाभगः सर्वलाभं करोति ११ शिखी रिष्फगो वस्तिगुह्यांघ्रिनेत्रे रुजा पीडनं मातु
लान्नैव शर्म्म सदा राजतुल्यं नरं सद्व्ययं नंदिपूर्णा विनाशं करोऽसौ करोति १२ चमत्कारचिंतामणेर्ग्रंथ
स्त्वगानां फलं कीर्तितं भट्टनारायणेन पठेद्यो द्विजस्तस्य राज्ञां सभायां समक्षे प्रवक्तुं न चान्ये समर्थाः १

इति श्रीनारायणभट्टकृतचमत्कारचिंतामणिग्रंथः समाप्तः ॥१॥

१ चमत्कारचिंतामणेश्चारुटीकां चकारान्वयार्थप्रबोधप्रदीपां सुदेवस्तु धर्मेश्वरो मालवीयः प्रमोदाय भूदेवविद्व
ज्जनानाम् १ इति चमत्कारचिंतामणेरन्वयार्थदीपिकायां ग्रहभावफलाध्यायः समाप्तः संपूर्णम् ॥

श्रीकाशीविश्वनाथपुरी महल्लेमानमन्दिर श्रीसत्यनारायणयन्त्रा
लयमेयह चमत्कारचिन्तामणिटिकासंयुक्त बंगालीसाहुके इहाँ
छापागया मि: भादौवदी १ सम्वत् १९५५ वा: भयरो पाठक शुभं

IGNCA RAR
R-167
ACC No.